# Avalokiteshvara Stotram

# અવલોકિતેશ્વરસ્તોત્રમ્ ૧

## Document Information

Text title : Avalokiteshvara Stotram 1

File name : avalokiteshvarastotram1.itx

Category : deities_misc, buddha, stotra

Location : doc_deities_misc

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# અવલોકિતેશ્વરસ્તોત્રમ્ ૧

ॐ નમોઽવલોકિતેશ્વરાય ।
દેવમનુષ્યાસુરનુતચરણઃ પ્રતિહતજન્મજરારુજમરણઃ ।
લોકેશ ત્વં મામશરણ્યં રક્ષ કૃપાલો કુરુ કારુણ્યમ્ ॥ ૧॥

સંસારોદધિમધ્યનિમગ્નં ક્લેશમહોર્મિસમાહિતભગ્નમ્ ।
મામવધારય મા વિરુવન્તં ત્રાહિ મહાકૃપ નૌમિ ભવન્તમ્ ॥ ૨॥

તૃષ્ણાતિમિરોપદ્રુતનેત્રં મરણમહાભયવિહ્વલગાત્રમ્ ।
પાલય ભગવન્નવલોકય માં યાવદવીચિં યામિ ન વિષમામ્ ॥ ૩॥

કૃતમન્યસ્ત્રીગ્રહણમજસ્રં હતમજ્ઞેયં પ્રાણિસહસ્રમ્ ।
નાથ મયા કૃતપાપમશેષં નાશય સંપ્રતિ કાયિકદોષમ્ ॥ ૪॥

યજ્જીવિતસત્કારનિમિત્તં લોકાન્ નિત્યં ભણિતમસત્યમ્ ।
તલ્લોકેશ્વર શમય સમસ્તં વાચિકનરકં ચિરમભ્યસ્તમ્ ॥ ૫॥

સત્ત્વાનામિહ ચિન્તિતમહિતં સ્વયમનુમોદિતમપિ નરવિહિતમ્ ।
અધુના તન્મમ માનસપાપં સ્ફોટય નાથ કરોમિ વિલાપમ્ ॥ ૬॥

દેવમનુષ્યાસુરજાતીનાં તિર્યઙ્નારકપ્રેતગતીનામ્ ।
સત્ત્વા યે નિવસન્તિ સદાર્તા રક્ષસિ તાનિતિ તવ મયિ વાર્તા ॥ ૭॥

તેન મમોપરિ સૃજ કારુણ્યં વીક્ષ્ય શરીરગતં તારુણ્યમ્ ।
ઇતિ શ ृણુ ભગવન્ ભવતિ ભણામિ યાવન્નરકં નૈવ વિશામિ ॥ ૮॥

કિં ચોપેત્ય કરોષિ પરાર્થં મુઞ્ચસિ ભગવન્ મામકૃતાર્થમ્ ।
અથવા પ્રેક્ષ્ય કૃપા તવ પુણ્યં જનયસિ દૃષ્ટં કથમવિપન્નમ્ ॥ ૯॥

સ્મરણેનાપિ ભવસિ પરિતુષ્ટઃ ક્ષિપસિ ચ કલુષં કિમિતિ ન દૃષ્ટઃ ।
યસ્માદ્ ભગવન્ પરહિતદક્ષ ક્ષેપં મા કુરુ મામિહ રક્ષ ॥ ૧૦॥

દન્તિતુરઙ્ગમપુત્રકલત્રં રાજ્યમકણ્ટકવેશ્મવિચિત્રમ્ ।

અસ્થિશિરોઽસૃઙ્માંસપર્યન્તં ભવતાર્થિભ્યો દત્તમનન્તમ્ ॥ ૧૧॥

અઞ્જનગુટિકાપાદુકસિદ્ધિઃ સિદ્ધૌષધિમણિમન્ત્રવિશુદ્ધિઃ ।
સિદ્ધ્યતિ યક્ષસ્ત્રીપુરવેશઃ તુષ્યસિ યસ્ય ત્વં લોકેશ ॥ ૧૨॥

યે કરચરણવિલોચનહીના વિવિધવ્યાધિમહાભયદીનાઃ ।
તે ત્વયિ તુષ્ટે પુષ્ટશરીરા વિલસન્ત્યરુજો ગુણગમ્ભીરાઃ ॥ ૧૩॥

ગરલં વ્યાધિર્ગ્રહડાકિન્યઃ શાન્તિં યાન્તિ સદા યોગિન્યઃ ।
સરતિ ન તસ્ય પુરો યમદૂતઃ પ્રોતો યસ્ય ચ ત્વં જિનભૂતઃ ॥ ૧૪॥

ઇતિ લોકેશ્વર કિં ક્રિયમાણં મુઞ્ચસિ ભગવન્ મામત્રાણમ્ ।
રૌમ્યહમનુદિનમુદ્યતપાણિર્નાશય ત્રાસસમાકુલવાણિઃ ॥ ૧૫॥

યદ્વિષયેન્દ્રિયચઞ્ચલમનસા કૃતબહુપાપં વ્યાકુલમનસા ।
નીતં જન્મ મયાઽસ્મિન્ સકલં જઠરનિમિત્તં ભ્રમતા વિકલમ્ ॥ ૧૬॥

તત્કુરુ સંપ્રતિ મમ લોકેશ પ્રણતો વિવિધાઞ્જલિરહમેષઃ ।
યેનાભુક્ત્વાપાયિકદોષં સુગતિં ભવતો યામિ ન મોક્ષમ્ ॥ ૧૭॥

મોહદ્વેષવિનાશનહેતુસ્ત્વં સંસારમહોદધિસેતુઃ ।
પતિતસ્ત્રસ્તોત્થાપિતબાહુસ્ત્વં ગુરુદુરિતનિશાકરરાહુઃ ॥ ૧૮॥

દેશિતસુગતાનુત્તરતત્ત્વસ્ત્વં પાલિતબહુદુઃખિતસત્ત્વઃ ।
નિર્જિતદુર્જયમન્મથમારસ્ત્વં સન્તીર્ણભવાર્ણવપારઃ ॥ ૧૯॥

સકલાલાનનિકૃન્તનદેહસ્ત્વં પરિભાવિતજગતસુદેહઃ ।
ભગવન્નનુપમકરુણાસિન્ધુસ્ત્વં જનવિદિતોઽકારણબન્ધુઃ ॥ ૨૦॥

લીલાવિદલિતકર્મવિભઙ્ગસ્ત્વં પરહિતવિષયવ્યાસઙ્ગઃ ।
દિવ્યધ્યાનસમાહિતચિત્તસ્ત્વં યાચકસાધારણચિત્તઃ ॥ ૨૧॥

પરમપકુર્વન્નપિ કરુણાવાન્ મયિ પરિતોષં ન કરોષિ ભવાન્ ।
કથમિહ મોહમહોરગદષ્ટં વિષયશરીરમકુશલં ભ્રષ્ટમ્ ॥ ૨૨॥

સકલજનાર્થં પ્રતિ યા કરુણા સા કિં ભવતો નિયતસ્ફુરણા ।
યેન ન રક્ષસિ કિલ્વિષવન્તં ભવતઃ પુરતો માં વિરુવન્તમ્ ॥ ૨૩॥

નાથ કૃપા તે વ્યોમવિશાલા સત્ત્વેષુ હિ યથામ્બુદધારા ।
સ્થલજલનિમ્નોન્નતબહુદેશે સરતિ નિરન્તરમનિશમશેષે ॥ ૨૪॥

ઇતિ ભગવત્સ્મરણાદ્યત્પુણ્યં મમ તેનેદં જગદક્ષુણ્ણમ્ ।
લભતાં શ્રીપોતલકાચલવાસં જનયતુ સુન્દરવિવિધવિલાસમ્ ॥ ૨૫॥

ઇતિ શ્રીમદાર્યાવલોકિતેશ્વરભટ્ટારકસ્ય ચરપતિપાદવિરચિતં સ્તોત્રં સમ્પૂર્ણમ્ ॥

*Avalokiteshvara Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*